प्राथ. स्कूल शिक्षा परीक्षा 2015                                    20620021

पुस्तिका में पृष्ठों की संख्या / No. of Pages in Booklet 16

पुस्तिका में प्रश्नों की संख्या / No. of Questions in Booklet 150

प्रश्न-पत्र पुस्तिका संख्या / Question Paper Booklet No.

# LS - 61

**SUBJECT CODE – 14**

विषय / SUBJECT Sanskrit

परीक्षा दिनांक 24-7-16

**समय : 3.00 घण्टे**
**Time : 3.00 Hours**

**अधिकतम अंक : 300**
**Maximum Marks : 300**

## परीक्षार्थियों के लिए निर्देश

1. **सभी प्रश्नों के उत्तर दीजिए ।**
2. **सभी प्रश्नों के अंक समान हैं ।**
3. प्रत्येक प्रश्न का केवल एक ही उत्तर दीजिए ।
4. एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
5. प्रत्येक प्रश्न के चार वैकल्पिक उत्तर दिये गये हैं, जिन्हें क्रमशः **1, 2, 3, 4** अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले अथवा बबल को उत्तर-पत्रक पर **नीले बॉल प्वाइंट पेन** से गहरा करना है ।
6. OMR उत्तर पत्र इस परीक्षा पुस्तिका के अन्दर रखा है । जब आपको परीक्षा पुस्तिका खोलने को कहा जाए, तो उत्तर पत्र निकाल कर ध्यान से केवल नीले बॉल पॉइंट पेन से विवरण भरें ।
7. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा ।** (गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है । किसी भी प्रश्न से संबंधित गोले या बबल को खाली छोड़ना गलत उत्तर नहीं माना जायेगा ।)
8. **प्रश्न-पत्र पुस्तिका एवं उत्तर पत्रक के पॉलिथीन बैग/सील को खोलने पर परीक्षार्थी यह सुनिश्चित कर लें कि उसके प्रश्न-पत्र पुस्तिका पर वही प्रश्न-पत्र पुस्तिका संख्या अंकित है जो उत्तर पत्रक पर अंकित है । इसमें कोई भिन्नता हो तो वीक्षक से दूसरा प्रश्न-पत्र प्राप्त कर लें । ऐसा न करने पर जिम्मेदारी अभ्यर्थी की होगी ।**
9. मोबाइल फोन अथवा इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।
10. कृपया अपना रोल नम्बर ओ.एम.आर. पत्रक पर सावधानीपूर्वक सही भरें । गलत अथवा अपूर्ण रोल नम्बर भरने पर 5 अंक कुल प्राप्तांकों में से काटे जा सकते हैं ।

**चेतावनी :** अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए विविध नियमों-प्रावधानों के तहत कार्यवाही की जाएगी । साथ ही विभाग ऐसे अभ्यर्थी को भविष्य में होने वाली विभाग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

## INSTRUCTIONS FOR CANDIDATES

1. **Answer all questions.**
2. **All questions carry equal marks.**
3. Only one answer is to be given for each question.
4. If more than one answers are marked, it would be treated as wrong answer.
5. Each question has four alternative responses marked serially as **1, 2, 3, 4**. You have to darken only one circle or bubble indicating the correct answer on the Answer Sheet using **BLUE BALL POINT PEN.**
6. The OMR Answer Sheet is inside this Test Booklet. When you are directed to open the Test Booklet, take out the Answer Sheet and fill in the particulars carefully with blue ball point pen only.
7. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** (A wrong answer means an incorrect answer or more than one answers for any question. Leaving all the relevant circles or bubbles of any question blank will not be considered as wrong answer.)
8. **The candidate should ensure that Question Paper Booklet No. of the Question Paper Booklet and Answer Sheet must be same after opening the polythene bag/seal. In case they are different, a candidate must obtain another Question Paper. Candidate himself shall be responsible for ensuring this.**
9. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.
10. Please correctly fill your Roll Number in O.M.R. Sheet. 5 Marks can be deducted for filling wrong or incomplete Roll Number.

***Warning :*** *If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted. Department may also debar him/her permanently from all future examinations.*

**इस परीक्षा पुस्तिका को तब तक न खोलें जब तक कहा न जाए ।**
**Do not open this Test Booklet until you are asked to do so.**

**14**

1. उचितमव्ययं चित्वा रिक्तस्थानपूर्तिः कर्तव्या-
गच्छतु भवान् _______ दर्शनाय ।
(1) चिरम्
(2) मिथ्या
(3) पुरा
(4) पुनर्

2. अव्ययं चित्वा रिक्तस्थानपूर्तिः कर्तव्या '______ गच्छति उपरि च दशा चक्रनेमिक्रमेण ।'
(1) नीच्चैः
(2) अधःसु
(3) पुनः
(4) शनैः

3. "_______ अस्माकं गृहे यज्ञं भविष्यति ।"
उपर्युक्त वाक्ये उचितमव्ययं स्थापयतु
(1) ह्यः
(2) परह्यः
(3) सहसा
(4) श्वः

4. "मुहूर्तं ज्वलितं श्रेयो न च धूमायितं _______ ।"
(1) सहसा
(2) चिरम्
(3) खलु
(4) अद्य

5. उचिताव्ययेन रिक्तस्थानं पूरयितव्यम् – "न योत्स्य इति गोविन्दमुक्त्वा ______ बभूव है ।"
(1) तूष्णीम्
(2) मिथ्या
(3) अधः
(4) सह

6. "न च प्रयोजनं ________ धूर्तः चेष्टते कदाचन"
उचिताव्ययेन रिक्तस्थानं पूरयत –
(1) पुरा
(2) खलु
(3) किल
(4) अन्तरा

7. उचिताव्ययेन रिक्तस्थानं पूरयत – "दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां _______ ।"
(1) बिना
(2) सह
(3) धिक्
(4) पुरा

8. उचिताव्ययप्रयोगेण रिक्तस्थानपूर्तिः कर्तव्या – "मिथ्यापवादकारिणं ______ तं असत्यभाषिणम् ।"
(1) तूष्णीम्
(2) शनैः
(3) धिक्
(4) किल

9. 'सर्व' शब्दस्य पुल्लिंगसप्तमीएकवचने रूपं स्यात्
(1) सर्वे ।
(2) सर्वस्मिन् ।
(3) सर्वौ ।
(4) सर्वेषु ।

10. 'सखि' शब्दस्य चतुर्थीएकवचने रूपमस्ति
(1) सखायै ।
(2) सखाय ।
(3) सख्ये ।
(4) सख्यै ।

11. 'पितृ' शब्दस्य तृतीयाएकवचने रूपमस्ति –
(1) पितरा ।
(2) पितरेण ।
(3) पित्रेण ।
(4) पित्रा ।

12. 'भवत्' शब्दस्य द्वितीयाबहुवचने रूपमस्ति –
(1) भवन्तः ।
(2) भवतः ।
(3) भवतान् ।
(4) भवान् ।

13. 'नदी' शब्दस्य षष्ठीएकवचने रूपमस्ति
(1) नद्या ।
(2) नदीनाम् ।
(3) नद्याम् ।
(4) नद्याः ।

14. 'मति' शब्दस्य द्वितीयाबहुवचने रूपमस्ति
(1) मतीन् ।
(2) मतीः ।
(3) मतयः ।
(4) मती ।

15. 'मधु' शब्दस्य नपुंसकलिंग–द्वितीयाद्विवचने रूपमस्ति –
(1) मधे ।
(2) मधौ ।
(3) मधूनि ।
(4) मधुनी ।

16. 'मनस्' शब्दस्य नपुंसकलिंग–तृतीयाएकवचने रूपमस्ति –
(1) मनेन ।
(2) मनना ।
(3) मनसा ।
(4) मनसैः ।

17. 'भू' धातोः लोट्लकारे प्रथमपुरुष–एकवचने वैकल्पिकं रूपमस्ति –
(1) भव ।
(2) भवत ।
(3) भवतात् ।
(4) भवेः ।

18. 'पा' धातोः लृट्लकारे अन्यपुरुषरूपाणि सन्ति
(1) पिबिस्यति पिबिस्यतः पिबिस्यन्ति ।
(2) पास्यति पास्यतः पास्यन्ति ।
(3) पीस्यति पीस्यतः पीस्यन्ति ।
(4) पिस्यति पिस्यतः पिस्यन्ति ।

19. 'पठ्' धातोः लङ्लकारे मध्यमपुरुष–बहुवचने रूपमस्ति –
(1) अपठत् ।
(2) अपठत ।
(3) अपठतम ।
(4) अपठताम् ।

20. 'हस्' धातोः विधिलिङ्लकारे मध्यमपुरुष एकवचने रूपमस्ति –
(1) अहसेः ।
(2) हसते ।
(3) हसेः ।
(4) हसेत ।

21. 'हन्' धातोः लोट्लकार-अन्यपुरुषबहुवचने रूपमस्ति –
(1) हनन्तु ।
(2) हन्तु ।
(3) हन्यतु ।
(4) घ्नन्तु ।

22. 'सेव्' धातोः लृट्लकारे प्रथमपुरुषएकवचने रूपमस्ति –
(1) सेविस्यते ।
(2) सेविश्यते ।
(3) सेवस्यते ।
(4) सेविष्यते ।

23. 'रुच्' धातोः लोट्लकार-प्रथमपुरुषएकवचने रूपमस्ति –
(1) रोचतु ।
(2) रुचतु ।
(3) रोचताम् ।
(4) रोचेताम् ।

24. 'पच्' धातोः लङ्लकार-मध्यमपुरुषएकवचने रूपमस्ति –
(1) अपचत् ।
(2) अपचः ।
(3) अपचताम् ।
(4) अपचेताम् ।

25. धातोः क्त-क्तवतू प्रत्यययोः कस्मिन्नर्थे प्रयोगः भवति ?
(1) वर्तमानकालार्थे ।
(2) भूतकालार्थे ।
(3) भविष्यत्कालार्थे ।
(4) अनद्यतन भविष्यत्कालार्थे ।

26. निम्नलिखितेषु शानच् प्रत्ययान्तः शब्द अस्ति –
(1) पचानं ।
(2) पचन्तं ।
(3) पचमानं ।
(4) पचमन्तं ।

27. 'भुज्' धातोः तुमुन् प्रत्ययान्तः शब्दः वर्तते –
(1) भुजतुम् ।
(2) भोजतुम् ।
(3) भोक्तुम् ।
(4) भुक्तुम् ।

28. 'प्रकृत्य' पदे प्रकृतिप्रत्ययौ स्तः –
(1) प्र + कृत् + यत् ।
(2) प्र + कृ + ल्यप् ।
(3) प्र + कृत् + य ।
(4) प्र + कृति + यत् ।

29. 'बन्धुता' पदे प्रत्ययः अस्ति –
(1) तरप् ।
(2) तमप् ।
(3) तृच् ।
(4) तल् ।

30. 'आम्रमयम्' शब्दे प्रत्ययः अस्ति –
(1) अय ।
(2) मयट् ।
(3) मतुप् ।
(4) यत् ।

31. 'कारकः' पदे प्रत्ययः अस्ति –
(1) घञ् ।
(2) ण्यत् ।
(3) णिनि ।
(4) ण्वुल् ।

32. निम्नलिखितेषु 'यत्' प्रत्ययान्तः शब्दः वर्तते –
(1) चेयः ।
(2) वृत्यः ।
(3) आदृत्यः ।
(4) मृज्यः ।

33. "प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता" अस्याम् पंक्तौ कस्मिन् पदे श्लेषालङ्कारः अस्ति –
(1) प्रतिकूलता ।
(2) विफलत्वम् ।
(3) बहुसाधनता ।
(4) विधौ ।

34. "स्वभावोक्तिरसौ चारु यथावद् वस्तुवर्णनम् ।" स्वभावोक्ति - अलङ्कारस्य अस्मिन् लक्षणे "चारु" शब्दस्य तात्पर्यमस्ति –
(1) गुणदोषानुरूपं यथावद् वर्णनम् ।
(2) चमत्कारशून्यं वर्णनम् ।
(3) सहृदयहृदयावर्जकम् वर्णनम् ।
(4) ग्राम्यं छन्दोबन्धनरहितम् वर्णनम् ।

35. उपमा अलङ्कारे कीदृशं साम्यम् उपस्थाप्यते ?
(1) अस्पष्टम् ।
(2) स्पष्टम् ।
(3) वैचित्र्यजनकम् ।
(4) प्रस्फुटं सुन्दरं च ।

36. रूपक-अलङ्कारस्य प्रमुखा विशेषता का ?

(1) प्रकृताप्रकृतयोः भेदः ।

(2) प्रस्तुताप्रस्तुतयोः वैधर्म्यम् ।

(3) प्रस्तुताप्रस्तुयोरभेदः ।

(4) उपमानोपमेययोः निगरणम् ।

37. उपमेयस्य समेन सम्भावनम् उत्कटकोटिकसंशयः वा कस्मिन् अलङ्कारे भवति –

(1) विशेषोक्तौ ।

(2) विभावनायाम् ।

(3) निदर्शनायाम् ।

(4) उत्प्रेक्षायाम् ।

38. उपमा परिकल्पकः अभवन् वस्तुसम्बन्धः कस्मिन् अलङ्कारे भवति ?

(1) व्यतिरेक-अलङ्कारे ।

(2) भ्रान्तिमान्-अलङ्कारे ।

(3) निदर्शना-अलङ्कारे ।

(4) सन्देह-अलङ्कारे ।

39. उपमेयोपमानयोः बिम्बप्रतिबिम्बभावः कस्मिन् अलङ्कारे प्रस्तूयते ?

(1) दृष्टान्त-अलङ्कारे ।

(2) अर्थान्तरन्यास-अलङ्कारे ।

(3) तुल्ययोगिता अलङ्कारे ।

(4) वक्रोक्ति अलङ्कारे ।

40. प्रस्तुतानामप्रस्तुतानां वा पदार्थानाम् एकधर्माभिसम्बन्धः कस्मिन् अलङ्कारे भवति ?

(1) तुल्ययोगितायाम् ।

(2) प्रतिवस्तूपमायाम्।

(3) निदर्शनायाम् ।

(4) अर्थान्तरन्यासे ।

41. प्रायेण पूर्वपदार्थप्रधानो समासः वर्तते –

(1) केवलसमासः ।

(2) अव्ययीभावसमासः ।

(3) तत्पुरुषसमासः ।

(4) बहुव्रीहिसमासः ।

42. 'अतिहिमम्' पदस्य समासविग्रहः स्यात् –

(1) हिमस्य आधिक्यम् ।

(2) हिमम् अतिक्रम्य ।

(3) हिमस्य अत्ययः ।

(4) हिमम् परित्यज्य ।

43. 'धान्यार्थः' पदे समासस्य नाम निर्दिशतु ।

(1) तृतीया-तत्पुरुषः ।

(2) चतुर्थी-तत्पुरुषः ।

(3) पञ्चमी-तत्पुरुषः ।

(4) षष्ठी-तत्पुरुषः ।

44. 'चोर भयम्' पदस्य समासविग्रहः अस्ति –

(1) चोरेण भयम् ।

(2) चोरस्य भयम् ।

(3) चोरात् भयम् ।

(4) चोरे भयम् ।

45. 'अतिक्रान्तो मालाम्' इत्यस्य समस्तपदं स्यात् –

(1) अतिमालम् ।

(2) अतिमालः ।

(3) अतिमालस्य ।

(4) अतिमाला ।

46. 'पञ्चगवम्' पदस्य समासविग्रहं चिनुत –

(1) पञ्च च ते गवम् च ।

(2) पञ्चान् गवान् ।

(3) पञ्चानां गवां समाहारः ।

(4) पञ्च गावो यस्य सः ।

47. 'लम्बकर्णः' पदस्य समासविग्रहः भवति –
(1) लम्बः चासौ कर्णः च ।
(2) लम्बौ कर्णौ यस्य सः ।
(3) लम्बः कर्णः यस्य सः ।
(4) लम्बः च कर्णः च ।

48. 'यवाश्च चणकाश्च' इत्येतस्य समस्तपदमस्ति –
(1) यवचणकाः ।
(2) यवचणकौ ।
(3) यवचणकम् ।
(4) यवचण के ।

49. शुद्ध वाक्यं चिनुत –
(1) रमेशः विद्यालयाय गच्छति ।
(2) रमेशः विद्यालये गच्छन्ति ।
(3) रमेशः विद्यालयं गच्छति ।
(4) रमेशः विद्यालये गच्छतः ।

50. शुद्धं वाक्यं स्यात् –
(1) भ्रातृभ्यः महेशः कनिष्ठः ।
(2) भ्रातृन् महेशः कनिष्ठः ।
(3) भ्रातृभिः महेशः कनिष्ठः ।
(4) भ्रातृषु महेशः कनिष्ठः ।

51. शुद्धं वाक्यं भविष्यति –
(1) मया पुस्तकं पठिता ।
(2) अहं पुस्तकं पठितवत् ।
(3) अहं पुस्तकं अपठत् ।
(4) मया पुस्तकं पठितम् ।

52. शुद्धं वाक्यं स्यात् –
(1) सा काव्यः रचयन् तिष्ठति ।
(2) सा काव्यं रचयन् तिष्ठति ।
(3) सा काव्यं रचयन्ती तिष्ठति ।
(4) सा काव्यं रचयन्तः तिष्ठति ।

53. शुद्धं वाक्यं स्यात् –
(1) सा तां त्यजितुं तत्र गमिष्यसि ।
(2) सा तां त्यक्तुं तत्र गमिष्यति ।
(3) सा तां संत्यजितुं तत्र गमिष्यतः ।
(4) सा तां त्यज तत्र गमिष्यति ।

54. शुद्धं वाक्यं चिनुत –
(1) राजपुरुषः अहंकारी भवन्ति ।
(2) राजपुरुषाः अहंकारी भवन्ति ।
(3) राजपुरुषाः अहंकारिणः भवन्ति ।
(4) राजपुरुषाः अहंकारीणि भवन्ति ।

55. शुद्ध वाक्यमस्ति –
(1) प्राप्तोदकः ग्रामः वैभवशाली भवन्ति ।
(2) उदकप्राप्तः ग्रामः वैभवी भवति ।
(3) उदकप्राप्ताः ग्रामाः विभवाः भवति ।
(4) प्राप्तोदकाः ग्रामाः वैभवशालिनः भवन्ति ।

56. 'द्युलोक और पृथिवी लोक के बीच अन्तरिक्ष है ।' उपर्युक्त वाक्यस्य संस्कृतानुवादः भविष्यति –
(1) द्युलोकं पृथिवी लोकं च मध्ये अन्तरिक्षम् अस्ति ।
(2) द्युलोके पृथिवीलोके च मध्ये अन्तरिक्षमस्ति ।
(3) द्युलोकं पृथिवीलोकं च अन्तरा अन्तरिक्षमस्ति ।
(4) द्युलोकपृथिवीलोकयोः अन्तरा अन्तरिक्षमस्ति ।

57. 'वह सन्मार्ग पर चलता है ।'
उपर्युक्तवाक्यस्य संस्कृतानुवादः भवेत् –
(1) सः सन्मार्गे अभिनिविशति ।
(2) सः सन्मार्गोपरि चलति ।
(3) सः सन्मार्गं अभिनिविशते ।
(4) सः सन्मार्गाय अभिनिविशते ।

58. "वह गुरुकुल में अध्ययन के प्रयोजन से रहता है ।"
उपर्युक्त वाक्यस्य शुद्ध-संस्कृतानुवादः स्यात्

(1) सः गुरुकुलं अध्ययनाय वसति ।
(2) सः गुरुकुले अध्ययनं वसते ।
(3) सः अध्ययनेन गुरुकुलं उपवसति ।
(4) सः गुरुकुले अध्ययनात् हेतोः वसति ।

59. "सुरेश ने रमेश से सौ रुपये का कर्ज लिया है ।"
उपर्युक्त वाक्यस्य शुद्धानुवादः चेतव्यः –

(1) सुरेशः रमेशात् शतरूप्यकाणि अनयत् ।
(2) सुरेशः रमेशाय शतं धारयति ।
(3) सुरेशः रमेशेन शतरूप्यकाणि ऋणं नयति ।
(4) सुरेशः रमेशाय शतं नयति ।

60. "वह नौकर पर क्रोध करता है ।"
उपर्युक्त वाक्यस्य शुद्धानुवादः चेतव्यः –

(1) सः नौकरोपरि क्रुध्यति ।
(2) सः सेवके क्रुध्यति ।
(3) सः भृत्याय क्रुध्यति ।
(4) सः सेवकात् क्रुध्यति ।

61. "अध्यापक से गणित पढता है ।"
अस्य वाक्यस्य शुद्धानुवादः चेतव्यः –

(1) अध्यापकेन गणितं पठति ।
(2) अध्यापकाद् गणितं पठति ।
(3) गणितं अध्यैति अध्यापकेन ।
(4) गणितस्य पठति अध्यापकेन ।

62. "देवेश माता के लिये अच्छा है ।"
अस्य वाक्यस्य शुद्धानुवादः स्यात् –

(1) देवेशः मात्रे साधुः ।
(2) देवेशः मातुः साधुः ।
(3) देवेशः मातरि साधुः ।
(4) देवेशः मात्रं साधुः ।

63. "केशों के लिये चमरी को मारता है ।"
उपर्युक्त वाक्यस्य शुद्धानुवादः स्यात् –

(1) केशेभ्यः चमरीं ताडयति ।
(2) केशान् चमरीं हतति ।
(3) केशाभ्यः चमरीं घ्नन्ति ।
(4) केशेषु चमरीं हन्ति ।

64. भर्तृहरिमते मनुष्यस्य परं भूषणं किम् ?

(1) सुजनता ।
(2) विनयः ।
(3) क्षमा ।
(4) शीलम् ।

65. "हितं मनोहारि च दुर्लभं वचः ।"
इति केन उक्तम् ?

(1) भर्तृहरिणा ।
(2) भारविना ।
(3) बाणभट्टेन ।
(4) भासेन ।

66. श्रीमद्भगवद्गीतानुसारेण अव्यवसायिनां बुद्धयः कीदृश्यः भवन्ति ?

(1) बहुशाखाः ।
(2) अनन्ताः ।
(3) बहुशाखाः अनन्ताश्च ।
(4) एका ।

67. नचिकेता तृतीयवररूपेण किं वृणुते ?

(1) स्वर्ग्यमग्निम् ।
(2) पितुः योगक्षेमम् ।
(3) आत्मसम्बन्धिज्ञानम् ।
(4) दीर्घजीवनम् ।

68. शुकनासोपदेशानुसारेण लक्ष्मी: सरस्वतीपरिगृहीतं जनं कस्मात् नालिङ्गति ?

(1) ईर्ष्याकारणात् ।

(2) अपवित्रमिव मन्यमाना ।

(3) अनिमित्तमिव मन्यमाना ।

(4) पातकिनमिव मन्यमाना ।

69. 'स्वप्नवासवदत्तम्' नाटके उदयनस्य वीणाया: नाम किमासीत् ?

(1) स्वरवती ।

(2) भास्वती ।

(3) घोषवती ।

(4) पद्मावती ।

70. 'अभिज्ञानशाकुन्तलम्' नाटके दुष्यन्तशकुन्तलयो: पुत्रस्य नाम किम् वर्तते ?

(1) अरिदमन: ।

(2) पुरुदमन: ।

(3) सर्वदमन: ।

(4) इन्द्रदमन: ।

71. अभिज्ञानशाकुन्तले परित्यागानन्तरं शकुन्तला कुत्र न्यवसत् ?

(1) कण्वाश्रमे ।

(2) अत्र्याश्रमे ।

(3) वसिष्ठाश्रमे ।

(4) मारीचाश्रमे ।

72. ऋग्वेदीय देवेषु हिरण्ययं कवचं क: बिभर्त्ति ?

(1) अग्नि: ।

(2) विष्णु: ।

(3) वरुण: ।

(4) पुरुष: ।

73. देवस्य नाम ऋषिनाम्ना सुमेलयत –

| | | | |
|---|---|---|---|
| A. | वरुण: (1.25) | P. | शुन:शेप |
| B. | अग्नि: (1.1) | Q. | मधुच्छन्दा |
| C. | पुरुष (10.90) | R. | नारायण: |
| D. | विष्णु: (1.154) | S. | दीर्घतमा |

(1) AP, BQ, CR, DS

(2) AS, BR, CQ, DP

(3) DR, CP, BS, AQ

(4) BR, AS, CP, DQ

74. होता, कविक्रतु:, सत्य: इत्यादय: कस्य देवस्य कृते उक्तम् ?

(1) विष्णो: ।

(2) अग्ने: ।

(3) पुरुषस्य ।

(4) वरुणस्य ।

75. 'अमृतस्य गोपा' कस्य देवस्य विशेषणं वर्तते ?

(1) अग्ने: ।

(2) विष्णो: ।

(3) पुरुषस्य ।

(4) वरुणस्य ।

76. विशेषणेन देवस्य नाम योजयत –

| | | | |
|---|---|---|---|
| अ. | उरुगाय: | क. | विष्णु: |
| ब. | सहस्राक्ष: | ख. | पुरुष: |
| स. | सुक्रतु: | ग. | वरुण: |
| द. | रत्नधातमम् | घ. | अग्नि: |

(1) अ ग, ब क, स ख, द घ

(2) अ क, ब ख, स ग, द घ

(3) द ग, स ख, ब क, अ घ

(4) अ घ, ब ग, स ख, द क

77. 'उरुचक्षसम्' विशेषणं कस्य देवस्य अस्ति ?

(1) अग्ने: ।

(2) वरुणस्य ।

(3) पुरुषस्य ।

(4) विष्णो: ।

78. 'गिरिष्ठा' विशेषणं कस्य देवस्य वर्तते ?

(1) विष्णोः ।

(2) पुरुषस्य ।

(3) अग्नेः ।

(4) वरुणस्य ।

79. ऋचः सामानि कस्मात् जज्ञिरे ?

(1) सर्व्वहुतः यज्ञात् ।

(2) आरण्यात् यज्ञात् ।

(3) ग्राम्यात् यज्ञात् ।

(4) मानस यज्ञात् ।

80. सम्बद्ध-ग्रन्थान् सम्मेलयत –

| | | | |
|---|---|---|---|
| A. | ऐतरेय ब्राह्मणम् | E. | ऋग्वेदस्य |
| B. | शतपथ ब्राह्मणम् | F. | शुक्ल यजुर्वेदस्य |
| C. | ताण्ड्य ब्राह्मणम् | G. | सामवेदस्य |
| D. | गोपथ ब्राह्मणम् | H. | अथर्ववेदस्य |

(1) AE, BF, CG, DH

(2) AF, BH, CE, DG

(3) CF, DE, BG, AH

(4) DE, CH, BF, AG

81. याज्ञवल्क्यमतानुसारेण विद्यानां कति स्थानानि सन्ति ?

(1) दश ।

(2) द्वादश ।

(3) चतुर्दश ।

(4) सप्त ।

82. महर्षिः वेदव्यासः कतिभिः वर्षैः महाभारतं कृतवान् ।

(1) चतुर्भिः ।

(2) पञ्चभिः ।

(3) त्रिभिः ।

(4) षड्भिः ।

83. अश्वघोष रचितम् सौन्दरनन्दं महाकाव्यं कतिषु सर्गेषु निबद्धः ?

(1) पञ्चदशसु ।

(2) अष्टादशसु ।

(3) द्वादशसु ।

(4) एकोनविंशतिषु ।

84. सुबन्धुः अग्रणी कविरस्ति –

(1) श्लेषरचनायाम् ।

(2) अनुप्रासरचनायाम् ।

(3) विरोधाभासरचनायाम् ।

(4) उत्प्रेक्षारचनायाम् ।

85. मेघदूतकाव्यं कस्मिन् छन्दसि उपनिबद्धम् ?

(1) स्रग्धराछन्दसि ।

(2) शार्दूलविक्रीडितछन्दसि ।

(3) वसन्ततिलकाछन्दसि ।

(4) मन्दाक्रान्ताछन्दसि ।

86. मृच्छकटिकनाटके विदूषकस्य नाम किम् वर्तते ?

(1) माढव्यः ।

(2) मैत्रेयः ।

(3) वसन्तकः ।

(4) मित्रावसुः ।

87. निम्नांकितासु रचनासु श्री शिवसागरत्रिपाठिनः रचना अस्ति –

(1) न हि भोजसमो नृपः ।

(2) सत्यमेव जयते ।

(3) प्राणाहुतिः ।

(4) बांगलादेशविजयः ।

88. "उद्यानं गत्वा अधिकारिणं पृष्ट्वा वृक्षमवचिनोति फलानि ।"

इत्यस्मिन् वाक्ये अकथितं कर्म किम् अस्ति ?

(1) उद्यानम् ।

(2) वृक्षम् ।

(3) फलानि ।

(4) अधिकारिणं ।

89. "देवदत्ताय रोचते मोदक: स्वदते च अपूप: ।"
उपर्युक्तवाक्ये प्रीयमाण: क: वर्तते ?
(1) मोदक: ।
(2) देवदत्त: ।
(3) अपूप: ।
(4) स्वदते ।

90. "अरण्ये गत:, वृक्षे स्थित: अपि चोरं दृष्ट्वा व्याघ्रात् बिभेति ।"
अस्मिन् वाक्ये कस्य कारकसूत्रस्य प्रवृत्तिरस्ति ?
(1) अपादाने पञ्चमी ।
(2) जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् ।
(3) भीत्रार्थानां भयहेतु: ।
(4) वारणार्थानामीप्सित: ।

91. "ग्रामस्य निकटं गहनवनमस्ति, तत्र निवसन्ति ते लुण्ठका: ।"
अस्मिन् वाक्ये प्रवृत्तं सूत्रमस्ति –
(1) षष्ठी शेषे ।
(2) षष्ठी हेतुप्रयोगे ।
(3) षष्ठ्यतसर्थप्रत्ययेन ।
(4) दूरान्तिकार्थै: षष्ठ्यन्यतरस्याम् ।

92. भाषा - उत्पत्तिसिद्धान्तेषु 'सम्पर्क सिद्धान्तस्य' प्रवर्तक: अस्ति –
(1) स्पेन्सर: ।
(2) डा. राये ।
(3) जो. रेवेज ।
(4) हर्डर: ।

93. अश्लिष्ट योगात्मक वर्गस्य प्रतिनिधि भाषा अस्ति –
(1) संस्कृत ।
(2) अरबी ।
(3) हिब्रू ।
(4) तुर्की ।

94. सांख्यमतानुसारेण बुद्धे: लक्षणमस्ति –
(1) अध्यवसाय: ।
(2) अभिमान: ।
(3) उभयात्मक: ।
(4) आहरणधारणप्रकाशकर: ।

95. तर्कभाषानुसारेण असमवायिकारणस्य उदाहरणमस्ति –
(1) तन्तु: ।
(2) तन्तुसंयोग: ।
(3) तुरीवेमादिकम् ।
(4) पट: ।

96. 'भरतनाट्यशास्त्रम्' कतिषु अध्यायेषु विभक्त-मस्ति –
(1) अष्टात्रिंशत् ।
(2) नवत्रिंशत् ।
(3) चत्वारिंशत् ।
(4) षड्त्रिंशत् ।

97. काव्यप्रकाशकारेण काव्यहेतव: निर्दिष्टा: –
(1) शक्ति: ।
(2) निपुणता ।
(3) अभ्यास: ।
(4) एते समुदिता: हेतव: न तु व्यस्ता: ।

98. अभ्यासावरोधात् उद्दीपकाऽनुक्रिययो: सम्बन्ध: शिथिलो भवति, नियमोऽस्ति –
(1) प्रभावस्य नियम:
(2) उपयोगिताया: नियम:
(3) अनुपयोगिताया: नियम:
(4) तत्परताया: नियम:

99. "शिक्षामनोविज्ञानं शैक्षणिकविकासस्य क्रमानुसारम् अध्ययनमस्ति" निम्नलिखितं कथनम् अस्ति –
(1) स्किनरस्य
(2) स्टीफन्सस्य
(3) हलस्य
(4) हरमनस्य

**100.** किशोरावस्थायां मनुष्यः गतिक्रियाशीलतयोः विकासे पूर्णतां प्राप्नोति, विकासोऽयं कथ्यते –

(1) शारीरिकविकासः

(2) अस्थिनां मांसतन्त्रीणाञ्च विकासः

(3) गत्यात्मकविकासः

(4) ग्रन्थीनां विकासः

**101.** सा प्रक्रिया यस्यां मनुष्यः स्ववातावरणस्य मध्ये संतुलनं प्राप्तुं प्रयतते, सा कथ्यते –

(1) अधिगमः

(2) समायोजनम्

(3) बुद्धिचातुर्यम्

(4) बुद्धिमत्ता

**102.** किशोरावस्था बृहत्संघर्षस्य, अवसादस्य, झंझावातविरोधयोश्य अवस्थाऽस्ति, कथनमिदं कस्यास्ति ?

(1) ए किल पैट्रिकस्य

(2) स्टेनले हालस्य

(3) ब्लेयरस्य

(4) सिम्पसनस्य

**103.** "बालकस्य विकासः शिरसा आरभ्य चरणं प्रति भवति" उपर्युक्तं कथनं विकासस्य केन सिद्धान्तेन सम्बद्धोऽस्ति –

(1) निश्चितदिक् सिद्धान्तेन

(2) विभिन्नसम्बन्धस्य सिद्धान्तेन

(3) निश्चितक्रमस्य सिद्धान्तेन

(4) परस्परसम्बन्धस्य सिद्धान्तेन

**104.** अभिप्रेरणा किञ्चिद् कार्यं करणाय –

(1) प्रतिक्रियां प्रददाति

(2) उद्दीपनं प्रददाति

(3) कार्यस्य मात्रां वर्धयति

(4) उपर्युक्तेषु किञ्चिदपि नास्ति

**105.** संवेगात्मक अभिप्रेरणाऽस्ति –

(1) बुभुक्षा

(2) विरोधिनां कृते विरोध प्रदर्शनम्

(3) हास्य प्रदर्शनम्

(4) पिपासा

**106.** मानसिकविभिन्नतानां मापनं क्रियते –

(1) बुद्धिपरीक्षणे

(2) रुचिपरीक्षणे

(3) संवेगात्मकपरीक्षणे

(4) अभिवृत्तिपरीक्षणे

**107.** व्यक्तिगतविभिन्नतासु ते अंशाः सम्मिलिताः सन्ति, येषाम् –

(1) प्रकटीकरणम् असंभवम्

(2) अध्यापनम् असंभवम्

(3) मूल्याङ्कनम् असम्भवम्

(4) मापनम् असम्भवम्

**108.** प्रतिभाशालिबालकानां बुद्धिलब्धिर्भवति –

(1) 140 तः अधिकम्

(2) 120 - 139

(3) 110 - 119

(4) 80 - 109

109. संज्ञात्मकविकासस्य प्रक्रियाया अवधिः 7 वर्षाद् आरभ्य 11 वर्ष पर्यन्तं भवति –

(1) अन्तर्दर्शी - अवधिः

(2) मूलसम्प्रत्ययात्मककालः

(3) संवेगात्मकगायककालः

(4) अमूर्तसम्प्रत्ययात्मककालः

110. विकास एका प्रक्रिया भवति –

(1) गर्भाधानात् मृत्युपर्यन्तं चलायमाना प्रक्रिया

(2) जन्मतः मृत्युपर्यन्तं चलायमाना प्रक्रिया

(3) शैशवावस्थातः मृत्युपर्यन्तं चलायमाना प्रक्रिया

(4) जन्मतः प्रौढावस्थापर्यन्तं चलायमाना प्रक्रिया

111. संवेगात्मकदशायां शिशोः व्यवहारः भवति –

(1) अशिष्ट-स्पष्ट-निष्कपटञ्च

(2) शिष्टास्पष्ट निष्कपटञ्च

(3) शिष्ट स्पष्ट निष्कपटञ्च

(4) अशिष्टास्पष्ट कपटपूर्णञ्च

112. "बुद्धि एका शक्तिः क्षमता वा नास्ति, या सर्वासु परिस्थितिषु समानरुपेण कार्यं करोति अपितु अनेकानां विभिन्न योग्यतानां योगरूपाऽस्ति" उपर्युक्तं कथनमस्ति –

(1) मुनरो महोदयस्य

(2) कोलेसनिकस्य

(3) थार्नडाईकस्य

(4) रायबर्नस्य

113. बुद्धिलब्धिमाध्यमेन व्यक्तौ कस्य स्तरस्य ज्ञानं प्राप्यते –

(1) शारीरिकस्तरस्य

(2) बौद्धिकस्तरस्य

(3) मानसिकस्तरस्य

(4) अधिगमस्तरस्य

114. निम्नलिखितासु का अधिगमहेतवे अनुकूला परिस्थितिरस्ति –

(1) अधिगमकर्तुरिच्छा

(2) अधिगमकर्तुस्तत्परता

(3) अधिगमकर्तुः बुद्धिः

(4) उपर्युक्ताः सर्वाः

115. बालकस्य सा अवस्था या नवजन्मनः कालः उच्यते, यस्यां आकस्मिकपरिवर्तनानि भवन्ति, कथ्यते –

(1) शैशवावस्था

(2) किशोरावस्था

(3) बाल्यावस्था

(4) प्रौढावस्था

116. शिक्षामनोविज्ञानसहाय्येन शिक्षकः

(1) छात्रोपलब्धये मूल्यांकनं कर्तुं शक्नोति

(2) स्वशिक्षणकार्य साफल्यस्य मूल्यांकनं कर्तुं शक्नोति

(3) उपर्युक्तयोः 'अ' 'ब' उभयोः मूल्यांकनं कर्तुं शक्नोति

(4) समाजपरिवारयोः मूल्यांकनं कर्तुं शक्नोति ।

117. सफलतमशिक्षकः स एवास्ति यः व्यक्तिगत विभिन्नतानां शिक्षणाधिगमपरिस्थितौ –

(1) प्रभावमवरोधयेत्

(2) दुरुपयोगं कुर्यात्

(3) सफलतमं प्रयोगं कुर्यात्

(4) उपर्युक्तेषु किञ्चिदपि नास्ति

**118.** कस्यचित् मनुष्यस्य वास्तविकम् आयु: 20 वर्षाणि तथा च मानसिकम् आयु 25 वर्षाणि प्राप्यते, तदा तस्य बुद्धिलब्धिर्भविष्यति

(1) 120
(2) 130
(3) 125
(4) 150

**119.** बुद्धे: द्विखण्ड सिद्धान्तस्य प्रतिपादनं कृतम् –

(1) थार्नडाईकेन
(2) स्पियरमेनेन
(3) गिलफोर्डेन
(4) थाम्पसनेन

**120.** निष्क्रियतावस्थाया: सम्बन्ध: निम्नलिखितासु केनाधिगमसिद्धान्तेन वर्तते –

(1) बुद्धिमत्ताया: सिद्धान्तेन
(2) प्रयत्नविस्मरणयो: सिद्धान्तेन
(3) उद्दीपकानुक्रिययो: सिद्धान्तेन
(4) शास्त्रीयानुबन्धस्य सिद्धान्तेन

**121.** क्रमसंख्याया: 1 तथा च क्रमसंख्या 2 इत्यनयो: मेलनं कुरुत –

| | **बुद्धिलब्धि:** | | **प्रतिभा** |
|---|---|---|---|
| (अ) | 120-131 | (i) | उत्कृष्टम् |
| (ब) | 60-69 | (ii) | प्रतिभाशाली |
| (स) | 90-109 | (iii) | मूर्ख: |
| (द) | 25-49 | (iv) | निर्बल बुद्धि: |

**कोड :**

| | अ | ब | स | द |
|---|---|---|---|---|
| (1) | (ii) | (iv) | (i) | (iii) |
| (2) | (i) | (iii) | (ii) | (iv) |
| (3) | (ii) | (i) | (iv) | (iii) |
| (4) | (iii) | (ii) | (i) | (iv) |

**122.** "विन्डोज विस्ता" उदाहरणम् अस्ति –

(1) एप्लीकेशन साफ्टवेयरस्य
(2) आपरेटिंग सिस्टमस्य
(3) ब्राउजरस्य
(4) शेयरवेयरस्य

**123.** अवाञ्छितम् असामाजिकञ्च 'ईमेल' कथ्यन्ते –

(1) स्पैम:
(2) फ्लेम:
(3) लुर्क:
(4) जंक:

**124.** प्रत्येकंवारं यदा "कम्प्यूटर सिस्टम" इति प्रारभ्यते तदा "आपरेटिंग सिस्टम" इमानि 'मेमोरी' इत्यस्मिन् गृह्णाति –

(1) ड्राइवर अपडेट्स:
(2) डिवाइस ड्राइवर्स
(3) डिवाइस मैनेजर:
(4) विंडोज अपडेट्स

**125.** केन "स्कैनर" यन्त्रेण एक: 'यूनिवर्सल प्रोडक्ट कोड' पठितुं शक्यते –

(1) बार कोडेन
(2) ओ सी आर इत्यनेन
(3) फ्लेट बैड इत्यनेन
(4) एम आई सी आर इत्यनेन

**126.** कम्प्यूटर मध्ये 'डेटा' आदान-प्रदानयो: नियम: कथ्यते

(1) इण्टरकनेक्शन:
(2) प्रोटोकॉल:
(3) समकालीनपैकेज:
(4) डेटासंचारण समकालीन:

**127.** 'नेटवर्क' इत्यस्मिन् 'कम्प्यूटर व्यवस्था' कथ्यते –

(1) NOS
(2) टोपोलाजी
(3) नोडलेआउट
(4) प्रोटोकॉल

128. संस्कृतव्याकरणे इत्संज्ञकस्य किं भवति ?
(1) आगमः ।
(2) विपर्ययः ।
(3) वृद्धिः ।
(4) लोपः ।

129. संस्कृतव्याकरणे 'लोपः' शब्देन वर्णस्य का अवस्था सूच्यते ?
(1) विकारः ।
(2) नाशः ।
(3) अदर्शनम् ।
(4) पुनरावर्तनम्।

130. निम्नलिखितेषु संयोगसंज्ञायुतः शब्दः वर्तते
(1) हरीशः ।
(2) अम्बुदः ।
(3) यमुनेशः ।
(4) जलदः ।

131. 'मध्वरिः' शब्दे संहितासंज्ञकौ वर्णौ स्तः
(1) म, अ ।
(2) ध्, व् ।
(3) उ, अ ।
(4) व्, र् ।

132. निम्नलिखितेषु पदसंज्ञकः शब्दः अस्ति
(1) लता ।
(2) हरि ।
(3) गुरु ।
(4) फल ।

133. लघुसिद्धान्तकौमुद्यानुसारेण आभ्यन्तरप्रयत्नः कतिधा भवति ?
(1) एकादश ।
(2) द्वादश ।
(3) पञ्च ।
(4) द्विधा ।

134. 'यण्' वर्णानां उच्चारणे बाह्यप्रयत्नस्य नाम अस्ति
(1) अल्पप्राणः ।
(2) महाप्राणः ।
(3) घोषः ।
(4) विवारः ।

135. 'धात्रंशः' पदस्य संधिविच्छेदः स्यात्
(1) धातरि + अंशः ।
(2) धात्र + अंशः ।
(3) धातृ + अंशः ।
(4) धात् + त्रंशः ।

136. 'एचोऽयवायावः' सूत्रानुसारेण 'ओ' वर्णस्य स्थाने अचि किं भवति ?
(1) आव् ।
(2) अव् ।
(3) व् ।
(4) ओव् ।

137. निम्नलिखितेषु प्रगृह्यसंज्ञकः शब्दः अस्ति
(1) हरिः
(2) गुरुः
(3) विष्णू ।
(4) गङ्गाः ।

138. 'वृद्धिरेचि' सूत्रस्य उदाहरणरूपेण भवितुं शक्यते
(1) उपेन्द्रः ।
(2) देवैश्वर्यम् ।
(3) गङ्गोदकम् ।
(4) जनेकता ।

139. लघुसिद्धान्तकौमुद्यानुसारेण 'वागीशः' पदस्य संधिविच्छेदः स्यात्
(1) वाङ् + ईशः ।
(2) वाच् + ईशः ।
(3) वाक् + ईशः ।
(4) वाज् + ईशः ।

**140.** 'अनुस्वारस्य ययि परसवर्णः' सूत्रसन्दर्भे अं + चितः पदस्य संधिः स्यात्
(1) अङ्चितः ।
(2) अञ्चितः ।
(3) अण्चितः ।
(4) अन्चितः ।

**141.** शिवोऽर्च्यः पदस्य सन्धिविच्छेदः स्यात्
(1) शिव + अर्च्यः ।
(2) शिवो + अर्च्यः ।
(3) शिवु + अर्च्यः ।
(4) शिवस् + अर्च्यः ।

**142.** 'पुना रमते' पदस्य सन्धिसूत्रानुसारेण सन्धिविच्छेदः स्यात्
(1) पुन + रमते ।
(2) पुनश्च + रमते ।
(3) पुनर् + रमते ।
(4) पुनु + रमते ।

**143.** द्वितीयपादमात्रे यस्मिन् अष्टादशमात्राः भवन्ति तस्य छन्दसः नाम वर्तते
(1) मन्दाक्रान्ता ।
(2) शार्दूलविक्रीडितम् ।
(3) आर्या ।
(4) शिखरिणी ।

**144.** इन्द्रवज्रा छन्दसि अन्ते कति गुरुवर्णाः भवन्ति ?
(1) एकः ।
(2) द्वौ ।
(3) न भवन्ति ।
(4) त्रयः ।

**145.** निम्नलिखित पंक्तौ छन्दसः नाम निर्दिशतु –
"असंशयं क्षत्र परिग्रहक्षमा,
यदार्यमस्यामभिलाषि मे मनः ।"
(1) वंशस्थम् ।
(2) द्रुतविलम्बितम् ।
(3) शालिनी ।
(4) वसन्ततिलका ।

**146.** "ननमयययुतेयं मालिनी भोगिलोकैः" उपर्युक्त लक्षणे 'भोगि' शब्देन का संख्या सूच्यते ?
(1) सप्त ।
(2) षड् ।
(3) अष्ट ।
(4) पञ्च ।

**147.** मन्दाक्रान्ता छन्दसि यतयः भवन्ति
(1) 4, 6, 7 वर्णोपरि
(2) 6, 11 वर्णोपरि
(3) 8, 4, 5 वर्णोपरि
(4) 1, 2, 7 वर्णोपरि

**148.** स्रग्धरा छन्दसि एकस्मिन् पादे कति वर्णाः भवन्ति ?
(1) 19
(2) 21
(3) 17
(4) 15

**149.** निर्धारितेषु छन्दस्सु अर्धसमवृत्तस्य उदाहरणमस्ति –
(1) रथोद्धता ।
(2) शालिनी ।
(3) मालिनी ।
(4) वियोगिनी ।

**150.** शिखरिणीछन्दसि प्रतिपादम् कतिषु वर्णेषु यतिः भवति ?
(1) 12, 5
(2) 6, 11
(3) 10, 7
(4) 11, 6

रफ कार्य के लिए स्थान / SPACE FOR ROUGH WORK